श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ क्षान्तिस्तबकः एकादशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ क्षान्तिस्तबकः एकादशः ॥

त्रायतामायताक्षं तद्धाम तामरसालयम्।
मदागसां प्रतीकारे महतामपि यत्क्षमा॥ **11.1** ॥

अपराधपरम्परामपाराम्
अहमेवं यदि नाम नारचेयम्।
कमलायतने क्षमागुणस्ते
कथमात्मानमसौ लभेत मातः॥ **11.2** ॥

महतां मम घोरकिल्बिषाणां
इह निःशेषगवेषणाऽपि दूरे।
पततामवलम्बनाय मातः
भवपङ्के बत नस्तव क्षमातः॥ **11.3** ॥

फणिशेखरशैलनाथकान्ते
भवती मूर्तिमती क्षमैव नूनम्।
अभवत् कथमन्यथा न पाप -
स्तव कोपप्रभवाय वायसोऽपि॥ **11.4** ॥

भवतीं प्रति विश्वमातरं
भवसिन्धोस्तरणार्थमातरम्।
स्वमहं प्रदिशामि रक्ष माम्
अपराधेषु समाचर क्षमाम्॥ **11.5** ॥

नित्यं त्वकृत्यमवशादपि न त्यजामि
कृत्यं घुणाक्षरनयादपि नाचरामि।
अत्यन्तमित्थमपराधमहोदधेर्मे
सत्यं शपे शरणमम्ब तव क्षमैव॥ **11.6** ॥

मातः क्षमा तव सखी मधुवैरिकान्ते
ख्यातः क्षमाधरतया निलयस्स शेषः।
त्वं तु क्षमानिधिरतः शतमागसां मे
क्षन्तुं तवोचितमशेषत एव तावत्॥ **11.7** ॥

अस्मत्कृतामतितरामपराधपङ्क्तिं
यन्मृष्यसे जननि तत्र न विस्मयो नः।
एवंविधोऽपि विलिलङ्घयिषे भवं यत्
तत्र क्षमा हि तव कस्य न विस्मयाय॥ **11.8** ॥

तत्तद्विचित्रदुरितानुगुणानि तीक्ष्णे
दातुं फलानि दयिते तव बद्धदीक्षे।
कस्येह जीवितकथा कलशाब्धिकन्ये
क्षान्तिं न चेन्नयसि तं विविधैरुपायैः॥ **11.9** ॥

अक्षान्तकारिणि दशास्यवधोक्तिदृप्ते
भक्षाय राक्षसवधूरभियाचमाने।
हन्त क्षमोदयजुषोऽप्यनुकम्पयैव
नक्षत्रनाथसहजे तव न क्षमाऽभूत्॥ **11.10** ॥

धनपतिपुरुहूतस्थाणुवेधो मुखानाम्
अपि च दधति शापं सम्पदः सम्परायम्।
इति गतिमवबुध्याप्यर्थकामाभिलाषात्
अजहदघशतं मां रक्ष मातः क्षमातः॥ **11.11** ॥

अनिशमुपचितानामागसां भूयसां मे
    निगमविततिरीष्टे निष्कृतिं नाभिधातुम्।
प्रभवति फलमेषां पद्मनाभो न दातुं
    कलशजलधिकन्ये क्षान्तिरेवेह युक्ता॥ **11.12** ॥

अमितदुरितकृद्भ्यो नित्यमस्मादृशेभ्यो
    हतहितचरितेभ्यो हन्त कुप्यन्तमुच्चैः।
नियतमनुगुणेन न्याययुक्तेन पद्मे
    कलयसि वचनेन क्षान्तिमन्तं प्रभुं तम्॥ **11.13** ॥

कलयति मनसा वा कर्मणा वा गिरा वा
    मधुरिपुमहिले यन्मादृशो नित्यमागः।
तदिदमगणयन्ती त्रायसे संसृतेर्नः
    शरणमिति गिरैव स्वामिनं क्षामयन्ती॥ **11.14** ॥

नवनवमपराधं साधयित्वा खलत्वात्
    जननि कृतवतो मे माधवं क्रोधवन्तम्।
वरुणनिलयकन्ये क्षान्तिमत्या भवत्याः
    शरणवरणतोऽन्यत् केवलं नावलम्बः॥ **11.15** ॥

प्रथिततमसि सर्गैरागसां रागसान्द्रे
    मयि यदि तु विधत्से नानुकम्पामकम्पाम्।
उपचितिमतिचित्रामेनसो मे न सोढुं
    प्रभवति स भवत्या नायकोऽजेयकोपः॥ **11.16** ॥

रचयति यदयं ते नेतरागः सरागः
    तदखिलमपि मृष्यन् त्राहि दीनं त्वमेनम्।
ननु क इह विमर्शे नापराधीति शौरेः
    कलशजलधिकन्ये कर्णयोर्वर्णयोच्चैः॥ **11.17** ॥

जलजटिलतडित्वद्दीप्तिकृष्णोपलाल्या
कृतिरुरुकटकश्रीरुज्ज्वलन्मेखलाभा।
वरतमवनमालालङ्कृतस्थानजुष्टा
वहसि हरिपुरन्ध्रि त्वं क्षमाभृत्त्वमर्हम्॥ **11.18**॥

पापारण्य हिरण्यदानववपुर्व्यापाटन प्रज्वलत् -
कोपाटोपकृपीडसम्भवनवज्वालाकराळाननम्।
देवाद्यैरपि दुष्करप्रसदनं देवं नृसिंहं रमे
क्षान्तिं नीतवती क्षणेन भवती किं ते परं दुष्करम्॥ **11.19**॥

नियन्ता यः पद्मे निरवधिदुरागः शतकृताम्
अपर्याप्तं जानात्यखिलनिरयव्रातमपि नः।
स एष त्वद्वाचा निखिलमपि सोढ्वाऽपचरितं
फलं वेत्ति स्वल्पं तदपि शरणोक्तेर्निजपदम्॥ **11.20**॥

क्षमां मूर्तामुद्यत्करचरणयोगां च करुणां
हतावद्यां विद्यामवयववतीमम्ब भवतीम्।
समाश्रित्यापत्याभ्युदय धनधान्यादिनिबिडः
बिडौजः सम्पत्तिं परिहसति भूमावपि जनः॥ **11.21**॥

क्षान्ते मन्तौ जननि सकले क्षम्यतां शब्दमात्रात्
भूयो भूयः कमपि निचयं पाप्मनां निर्मिमाणः।
वक्तुं लज्जे पुनरपि सहस्वेति वाराशिकन्ये
क्षान्तिं सा त्वां तदपि नयते काप्यकम्पानुकम्पा॥ **11.22**॥

कादाचित्कप्रपदनजुषां काङ्क्षितान् पूरुषार्थान्
अत्रामुत्राप्यखिलजननि प्राणिनामर्पयन्तीम्।
संत्यज्य त्वामपकृतिशतैरप्यशुष्यत्कटाक्षां
भिक्षाकीं तु प्रसभमपरां देवतां सेवतां कः॥ **11.23**॥

कृत्याकृत्य त्यजनकरणोत्साहिनां मादृशानां
    को वा दोषः कमलनिलये त्वत्क्षमायाः स दोषः।
येनैतस्याः क्वचिदविषयो नापराधः समस्ती -
    त्युद्यद्धैर्या वयमिह बहूनाचरामोऽपचारान्॥ **11.24**॥

अशेषैर्निर्वेशैरखिलनरकावल्यनुभवैः
    अघौघानास्माकानपि भृशमशक्यापनयनान्।
क्षमस्वेत्युक्त्यैव क्षपयसि मधुध्वंसिदयिते
    क एषः क्षान्त्यात्मा कथय निरुपाख्यस्तव गुणः॥ **11.25**॥

निर्मातुं प्रभवेम कर्म न वयं नित्यं किमप्यन्ततो
    यत्खल्वाचमनं तदप्यकुशलाः कर्तुं यथाचोदनम्।
दूरे ज्ञानकथा तथापि तु तवाक्षामक्षमावेदिनः
    जानीमो मनसैव देवि सुगमौ स्वर्गापवर्गावपि॥ **11.26**॥

कथयामि सारमिह किं कथया
    परमन्ययार्थितभवोपरमम्।
क्षमया त्वमेतमभिरक्ष मया
    विहितानि मा गणय देवि हिता॥ **11.27**॥

निगमविहितं प्रायश्चित्तं मदीयमहांहसां
    निरसनकृते नालं मातस्तव क्षमया विना।
गुरुतरमयःपिण्डं गर्वान्निगीर्णमहो रमे
    किमु जरयितुं शक्तं शुण्ठीकषायनिषेवणम्॥ **11.28**॥

भगवति वपुश्चेतोवाग्भिः प्रतिक्षणमर्जितं
    नवनवमिमं पापस्तोमं क्षमस्व मम स्वयम्।
कटकटरवक्रीडद् दंष्ट्रायुगी विकृताननं
    पुनरपि यथा नो पश्येयं भयङ्करमन्तकम्॥ **11.29**॥

सहमानाऽहरहर्मे सहस्रमागांसि सागरेन्द्रसुते।
स्थापयसि मां दयालो शरणव्रज्याधिराज्यपीठे त्वम्॥ **11.30**॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे क्षान्तिस्तबकः एकादशः॥